च्यतां गछाघनदृश्यतेतवव्यवहारइति शोधनकःजंअज्जोआणवेदित्तिनिःक्रम्यशका
रमुपगम्य अज्जअधिअरणिआभणंजि।अजुगछणादीशरितवववहाले शकारःसक्रो
धंकिंणादीशदिममववहालेजइणादीशदितदोआउत्तंलाआणंपालअंवहिणीवदिंविस्म एम॰
विअवहिणिअंअत्तिकंचविस्मविअराएदंअधिअरणिअंफेलिअएत्थअसंमअधिअलणि ८०

अंठावइश्शं इतिगंतुमिछतिशोधा अज्जलष्ठिअशालअमुहुत्तअंचिठ्ठदावअधिअरणिआ
णंणिवेदेमि अधिकरणिकानुपगम्य एशोलष्ठिअशालोकुविदोभणादि इतितदुकंभणाति।अ
धिकरणिकः सर्वमस्यमूर्खस्यसंभाव्यते भद्रउच्यतां आगच्छदृश्यतेतवव्यवहारः शोधनकः
शकारमुपगम्य अज्जअधिअरणिआभणंति आअच्छदीसदितुहववहारो· तापविसदुअज्जो· श
कारः सहर्षं· हीपढमंभणादिणदीसदिसंपदंदीशदित्ति ताणामभीदभीदाअधिअलणभोइआ जे
त्तिअहगेभणिश्शंतेत्तिअंपत्तिआवइश्शं भोदुपविशामिप्रविश्योपसृत्य सुभुहंअह्माणंतुम्हाणं
पिभुहंदेपिणदेमिच अधिकरणिकः स्वगतं अहोस्थिरसंस्कारताव्यवहारार्थिनः प्रकाशं उपवि
श्यतां शकारः आं अत्तणकेलकामेभूमीताजीहमेरोअदितहिंउवविशामि श्रेष्ठिनंप्रतिएशउप
विशामि शोधनकंप्रतिणंएत्थउपविशामि इतिअधिकरणिकमस्तकेहस्तंदत्वाएशउवविशा

मृछः
८१
81

मि इतिभद्रमोऽउपविशति अधिक भवान्कार्यार्थी शकारअधइं अधिकरणिकः तत्कार्यंक
थ्यपशकारः कस्सेकहुंकथयइस्सं एअवडकेपल्लकप्पमाणाहकुलेहगेजादेलाअशशुलेम
मपिदालाआतादशशहोइतामादा लाअशिआलेहगेममाविभइणीवदीएअ अधिकसर्वज्ञा
पत्ते किंकुलेनोपदिष्टेनशीलमेवात्रकारणं भवंतिनितरांस्फीताः विपिनेकंटकिद्रुमाः तदुच्यतां
कार्यं शकारःएव्वंभणामि अवलक्कादविणअमेकिंविकलइस्सदि तदोत्तेणवहिणीवदिणाप
रितुट्ठेणमेकीलिदुंलकिवडुंशव्वुज्जाणाणंपवलेपुप्फकरंडकजिस्मुज्जास्मेदिस्मेतहिंचपेक्खि
दुंअणुदिअंहगेशावेदुंशोधवेदुंपोसावेडंलुत्सावेदुंगच्छामि देव्वजोएणपेक्खामिवाइशित
पशलीलंणिवडिदंअधिकरणिकः अथज्ञायते कास्त्रीविपन्नेतिशकारः हंहोअधिअलणि मृ०
अभोइआकिन्निणआणामितता दिशिंणअलमंडणंकंचनशदभूषणिअंकेणविकुपुत्तेण ८१

अत्यकल्लवत्तशशकालणात्तुसुंमपुप्फकलंडकजिस्सुज्जाणंपविशिअबाहुपाशबलक्कालेव
शंतशेणिआमालिदाणमए इत्यर्द्धोक्तेचमुखमाहृणोति अधिकरणिकः अहोनगररक्खिणं
प्रमादः भोश्रेष्ठिकायस्थौ नमयेतिव्यवहारपदंप्रथममभिलिख्यतांकायस्थः जंअज्जोआणवे
दितथाकत्वाअज्जलिहिदं शकारः स्वगतं हीमादिकेउत्तलाअत्तेणविअयायशपिंडलकेण
अज्जमएअत्ताएव्वणिस्माशिदो भोदुएव्वंदाव प्रकाशं अहोअधिअलणभोइआणंमएणामिम
एज्जेव्वदिट्ठाकिंकोलाहलंकलेध इतिपादेनलिखनंप्रोंछति अधि कथंत्वयाज्ञातंयथारवल्वर्थ
निमित्तंबाहुपाशेनव्यापादिता शकारः हंहोएणंमुस्समूणाएमोघठाणएगीवालिआएणि
मुवस्मकेहिंआहलणट्ठाणेहिंतक्केमि श्रेष्ठिकायस्थौ जुज्जदिविअ शकारः स्वगतंदिट्ठिआ
पत्तुज्जीविदह्मिअविदमाद्दिके श्रेष्ठिकायस्थौ भोकंएसोववहारोअवलंबदि अधिकः इहहि

मृच्छः
८२
82

विधोव्यवहारः श्रेष्ठिकायस्थौ केरिसो अधिकरणिकः वाक्यानुसारेण अर्थानुसारेणच यस्ता
वद्वाक्यानुसारेण सखल्वर्थिप्रत्यर्थिभ्यः यश्चार्थानुसारेण सचाधिकरणिकबुद्धिनिःपाद्यः श्रे
ष्ठिकायस्थौ तावसंतसेणामादरं अवलंवदिववहारो अधिकरणिकः एवमिदं भद्रशोधनक
वसंतसेनामातरमनुद्वेजयन्नाह्वय शोधनः तथेतिनिष्क्रम्यगणिकामात्रासहप्रविश्य एदु २
अज्जा वृद्धा गदामेदारिआमित्तहरअं अत्तणोजोव्वणमणुभविउं एसोउणदीहाऊ भणादि आ
अच्छदु अधिअलणिओसद्दावेदि तामोहपरवसंमिव अत्ताणअं अवागच्छामि हिअअंमेथर
हरेदि अज्ज आदेसेहिमे अधिअरणमंडवस्समग्गं शोधनकः एदु २ अज्जा उभौपरिक्रामतः शो
धनकः एदं अधिअलणमंडवं एत्थपविसदु अज्जा इत्युभौप्रविशतः वृद्धा उपसृत्य सुहं
तुह्माणंभोदुभावमिस्साणं अधिकरणिकः भद्रेस्वागतमास्यतां वृद्धातथेत्युपविष्टा शका

एम०
८२

रः साक्षेपं आगदासिवुट्टकुट्टकुट्टणि आगदाशि २ अधिकरणिकः अपेत्वं किलवसंतसेनापामा
ताहद्धा अधरं अधिकरणिकः अथेदानीं वसंतसेना क्व गता हद्धा मित्तद्धरयं अधिकरणिकः
किंनामधेयं तस्य मित्रं। हद्धा स्वगतं हद्धी २ अदिलज्जणीयं। कुरदं प्रकाशं जणस्स पुच्छणीं
अ अंअत्थो णउणा अधिअरणिअस्स अधिकरणिकः अलं लज्जया व्यवहारस्त्वां पृच्छति श्रे
ष्ठिकायस्थो ववहारे पुच्छदि णत्थि दोसो कधेहि हद्धा कधं ववहारो जइ एव्वं तासुणंतु अ
ज्जमिस्सा सो रकुसत्थवाह विणयदत्तस्स णत्तिंनुसा अरदत्तस्स तणंनु सुगोहिदणामहेओ अज्ज
चालुदत्तो णामसेट्ठि चत्तरे पडिवमदि तहिं मे दारिआ जोव्वणसुहमणुभवदि शकारः सुदं अ
ज्जेहिं लिहीयंतु एदे अरकला चारुदत्तेण सह मम विवादे श्रेष्ठिकायस्थो चारुदत्तो मित्तेत्ति णत्थि
दोसो अधिव्यवहारो यं चारुदत्तमवलंवते श्रेष्ठिकापस्थौ एवं वित्त अधिधनदत्तवसंतसेणाअ

मृछ: ८३

८३

पंचारुदत्तस्स गेहं गतेत्ति लिख्यतां व्यवहारस्स प्रथमः पादः कथमार्यचारुदत्तोप्यस्माभिराह्वाययि
तव्यः अथवा व्यवहारः स्समाह्वयति भद्र शोधनक गच्छ आर्यचारुदत्तं खैरं असंभ्रांतमनुद्विग्नं सा
दरमाह्वय प्रस्तावेनाधिकरणिकस्त्वां द्रष्टुमिच्छतीति शोधनकः जं अज्जो आणवेदित्ति निःक्रांतः
चारुदत्तेन सह प्रविश्य च एदु २ अज्जो चारु विचिंत्य परिज्ञातस्समेएज्ञाशीलेन वकुलेन चा
यन्नत्समिदमाह्वानं अवस्थामभिशंकते सवितर्कं स्वगतं ज्ञातोनु किं स खलु बंधनविप्रमु
क्तो मार्गागतः प्रवहणेन मयापनीतः चारेक्षणस्सन्वयतेः श्रुतिमागतो वा येनाहमेवमभियु
क्त इव प्रयामि अथवा किं विचारितेन अधिकरणमंडपमेव गच्छामि · भद्र शोधनक अधिक
रणस्स मार्गमादेशयः शोध· एदु २ अज्जो इत्ति परिक्रामतः चारुद सशंकं तत्किमपरं रूरु
क्षस्वरं वासति वायसोपममात्मभृत्यामुहुराह्वपंति सव्यं च नेत्रं स्फुरति प्रसत्यममानिमित्तानि

एम० ८३

हि खेदयंति शोधन एदु २ अज्जो सेरमसंभंतं चारु० परिक्रम्याग्रतोवलोक्य शुष्कवृक्षस्थितो ध्वांक्ष आ
दित्याभिमुखस्तथा मयि चोद्यते वामं चक्षुर्घोरमसंशयं पुनरन्यतोवलोक्य अये कथमयं सर्प्पः
मयि विनिहितदृष्टिर्भिन्ननीलांजनाभः स्फुरितविततजिह्वः शुक्लदंष्ट्राचतुष्कः अभिपतति सरोषो
तिह्मिताध्मातकुक्षिर्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः अपि चेदं स्खलति चरणं भूमौ न्यस्तं न चा
र्द्रतमा मही स्फुरति नयनं वामो बाहुर्मुहुश्च विकंपते शकुनिरपरश्चायं तावद्विरौति हि नैकशः कथय
ति महाघोरं मृत्युं न चात्र विचारणा सर्वथा देवताः स्वस्ति करिष्यंति शोधनकः एदु० २ अज्जो इमं अ
धिअरणमंडवं पविसदु अज्जो चारु० प्रविश्य समंतादवलोक्य अहो अधिकरणमंडपस्य परा श्रीः इ
ह हि चिंतासक्तनिमग्नमंत्रिसलिलं दूतोर्मिशंखाकुलं पर्यंतस्थितचारुनक्रमकरं नागाश्वहिंस्रा
श्रयं नानावाशककंकपक्षिरुचिरं कायस्थसर्पास्पदं नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते

मृच्छः
८४
84

ते भवन्तु प्रविशन् शिरोघातमभिनीय सवितर्कं अहह इदमपरं सव्यं मे स्पंदते चक्षुर्विरौति वायसस्त
था पंथाः सर्पेणारुद्धो पं स्वस्ति वास्मासु दैवतः तावत्प्रविशामि इति प्रविशति अधिक· अयमसौ
चारुदत्तो य एषः घोणोन्नतं मुखमपांगविशालनेत्रं नैतद्धि भाजनमकारणदूषणानां नागेषु गो
षु तुरगेषु तथा नरेषु नह्याकृतिः सुसदृशं विजहाति वृत्तं चारु भो अधिकृतेभ्यः स्वस्ति हंहो नि
युक्ताः अपि कुशलं भवतां अधिकरणिकः ससंभ्रमं स्वागतमार्यस्य भद्र शोधनक आर्यस्यासन
मुपनय शोध आसनमुपनीय एदं आसनं एत्थ उवविसदु अय्यो चारु उपविशति शकारः सक्रो
धं आगदेशि रे इत्थिआघादआ आगदेशि अहो णाए ववहाले अहो धम्मे ववहाले जं एअअण
हइत्थियाघादुकाह आशणे दीअदि सगव्वं भो दुणं दीअदु अधिकरणिकः आर्य चारुदत्त अस्ति
भवतोस्या आर्याया दुहित्रा सह प्रसक्तः प्रणयः प्रीतिर्वा चारु कस्याः अधिकरणिकः अस्या इति

एम·
८४

वसंतसेनामातरंदर्शयति चारु उत्थाय आर्ये अभिवादये वृद्धा जाद चिरंमेजीव स्वगतं अअं सो चा
रुदत्तो सुणिखित्तं कुदारिआए जोव्वणं अधिकरणिकः आर्ये गणिका तव मित्रं चारु लज्जां नाटयति
शकारः लज्जाए आदु भीलुदाए वा चालित्तं अलिएण णिगूहिदुं स्वयं इत्थिअं मालिअ अत्थकालणाए
णिगूहदि न तं हि भट्टको अट्टी अज्ज चारुदत्त भणाहि अलं लज्जाए ववहारो खु एसो चारु सलज्जं भो
अधिकृते मया कथमीदृशं वक्तव्यं यथा गणिका मम मित्रमिति अथवा यौवनमत्रापराध्यति न
चारित्रं अधिकरणिकः व्यवहारः सविघ्नोयं त्यज लज्जां हृदि स्थितां ब्रूहि सत्यमलं धैर्यं छलमत्र न
गृह्यते अलं लज्जया व्यवहारस्त्वां पृच्छति चारु अधिकृतकेन सह मम व्यवहारः शकारः अले मए श
ह ववहाले चारु त्वया मह मम व्यवहारः सुदुःसहः शकारः अह इत्थिआ घादइआ तं तादिशिं लअ
णाशदभूषणिपं वशंतसेणिअं मालिअ संपदं कवडकावडिके भवित्अ णिगूहेसि चारु असंबद्धः

मृच्छ:
८५
85

खल्वसि अल्लैधिकरणिकः आर्यचारुदत्त अलमनेनब्रूहि सत्यं अपि गणिकातवमित्रं चारु एवमे
वं अधिकरणिकः आर्यवसंतसेनाक्व चारुः गृहंगताश्रेष्ठीकथंगदाकदागदा गच्छंतीवाकेणअणु
गदा चारु स्वगतं किंप्रच्छन्नंगतेतिब्रवीमिश्रेष्ठी अनुकधेहि चारु गृहंगता किमन्यद्ब्रवीमि शका
रः ममकेलकंपुष्फकरंडकजिस्सुज्जाणंपवेसिअ अत्थणिमित्तंवाहुपासवलक्कालेणमालिदाअ
एशंपदंवदशिद्यलंगदेत्तिचारु आः असंवद्धप्रलापिन् अभ्युक्षितोसि सलिलैर्नवलाहकानांचा
षाग्रपक्ष्मसदृशं भ्रमशमंतराले मिथ्येतदाननमिदंभवतस्तथाहि हेमंतपद्ममिव निःप्रभतामुपेति॥
अधिकरणिकः जनांतिकं तुलनंचाद्रिराजस्य समुद्रस्यचतारणं ग्रहणंचानिलस्येव चारुदत्तस्य
दूषणं प्रकाशं आर्यचारुदत्तःखल्वसौकथमिदमकार्यंकरिष्यतिघोणेत्यादिपवति शकारः किं एम·
पक्खवादेणववहालेदीशदि अधि अवेहिमूर्ख वेदार्थान्प्राकृतस्त्वंवदसिनचतेजिह्वानिप ८५

त्तितामध्याह्नेवीदत्तसेकेनत्तवसहसाद्दष्टिर्विचलिताादीमाग्रोपाणिमंत्रः क्षिपसिनचतेततत्क्षणंदृत्य
त्तेसोवारिश्चाचारुदत्तेचलयसिनत्तेदेहंहरतिभद्रः आर्यचारुदत्तः कथमयमकार्यंकरिष्यतिहत्वा
समुद्रमुद्रकोछुपमात्रशेषंदत्तानियेनहिधनान्यनपेक्षितानि सश्रेयसांकथमिवैकनिधिर्महात्मा
पापंकरिष्यतिधनार्थमवीरजुष्टं शकारः किंपक्खवादेणववहालेंदीसदिहश्चा हदाशजोदा
णिंणाशीकदंसुवस्समंडअंरत्तिंचोरेहिंअवहदत्ति तस्सकालणादोचदुस्समुद्दसारभूदंरअ
णावलिंदेदिसोदाणिंअच्छकल्लवत्तस्सकारणादोइमंअकज्जंकरेदि हाताादेसहिमेपुत्तिइति
रोदिति अधिकरणिकः आर्यचारुदत्तकिमसौपभ्यांगताउतमवहृतेनेति चारु ननुममप्र
सक्तेनगता तत्रज्ञाने किंपभ्यांगताउतमवहृतेनेतिप्रविश्यसामर्षोवीरकः पादप्पहारपरि
भवविमाणणावद्धगरूअवेरस्स अणुसोअंतस्सइपंकधंपिरत्तीपभादामेतातावेअधिअ

मृच्छक
८६

एणमंडवंउवसप्पामि प्रविश्यकेनसुहंअज्जमिस्साणं अधि अयेनगररक्षाधिकृतोवीरकः
वीरककिमागमनप्रयोजनं वीरकः हीरवंधणभेअणसंभमेअज्जकंअस्समन्तोदुग्घाडिदंप
वहणंवच्चदित्तिविआरंकरेंतोअस्समसंतोअरेतुएविआलोइदेमएविआलोइदव्वोत्तिभणंतो
जेव्वचंदणमहत्तलएणपादेणताडिदोऽम्हि एदंसुणिअअज्जमिस्सापमाणं अधिभद्रज्ञानी
थकस्सतत्प्रवहणमितिवीरः इमस्सअज्जचारुदत्तस्सवसंतसेणाआरूढापुष्पकरंडकति
ण्णुज्जाणंकीलिदुंणीअदित्तिपवहणवाहएणकहिदं शकारः पुणोविसुदंअजेहिंअधिएष
भोनिर्मलज्योत्स्नोराहुणाग्रस्यतेशशी जलंकूलावपातेनप्रसन्नंकलुषायते वीरकपश्चादिह
भवतोन्यायंद्रक्ष्यामः पएषअधिकरणेद्वार्यश्वस्तिष्ठति तमेनमारुह्यगत्वापुष्पकरंडकोद्या
नंदृश्यतां अस्तितत्रकाचिद्धिपत्रास्त्रीनवेति वीरकः जंअज्जोआणवेदिइतिनिःक्रांतःप्रवि

एम.
८६

ऽपच गदोम्हि तहिंदिट्ठं चमए इच्छि आकलेवरं सावदेहिं विलुप्पतं अद्दीकधंनुए जाणिदं इत्थि
आकलेवरंत्ति वीरकः सावसेसेहिं केसहत्थपाणिपादएहिं उपलक्खिदं मए अधि अहोधिग्वे
पम्मंलोकव्यवहारस्स यथायथेदं निपुणं विचार्यते तथा तथा संकटमेव दृश्यते अहोसुसंवाव्यव
हारनीतपोर्मतिस्त्कगोः पंकगतेवसीदतिचारुः स्वगतं यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः
पतंति एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्था बहुलीभवंति अधि आर्य चारुदत्तस्स समभिधी
यतां चारुः उष्टात्मा परगुणामत्सरी मनुष्यो रागांधः परमिह हंतुकामबुद्धिः किं यो यद्वदति मृष्येव
जातिदोषान्न क्रूरात्यंभवति न तद्विचारणीयं अपिच योहं लतां कुसुमितामपि पुष्पहेतोराकृष्य
नैव कुसुमावचयं करोमि सोहं कथं भ्रमरपक्षरुचौ सुदीर्घे केशे प्रगृह्य रुदतीं प्रमदां निहन्मि श
कारः हंहो अधिअलणभोइआ किं तुम्हेपक्खवादेण ववहालं पेक्खध जेण अज्जु वि एशे हदास

मृ.छ:
८७

चारुदत्ते आशरोधमली अदिअ अधिभट्ट शोधनक एवं क्रियतां शोधन तथा करोति चारु विचार्य
तं भो अधिकृता विचार्य जामि ति आसनादवतीर्य भूमो उपविशति शकारः स्वगतं सहर्षं नर्त्तित्वा
ही अ एण एमए कत्थो वे अस्सश्शमक्कके निवीडदे ता जहिं चालुदत्ताके उवविशदि तहिं हगे डवि
वशामि तथा कृत्वा चारुदत्ता पेक्खवमं ता भण २ मए मा डिदत्ति चारुभो अधिकृता दुष्टात्मेति श्रूर्वं श्लोकं
पठति सनिश्वासं स्वगतं मैत्रेय भोः किमिदमघमम्मोपघातो हा ब्राह्मणि द्विजकुले विमले प्रसूता
हा रोहसेन नहि पश्यसि मे विपत्तिं मिथ्यैव नंदसि परव्यसनेन नित्यं प्रेषितश्च मया तद्वार्त्ताविषणा
य मैत्रेयो वसंतसेनासकाशं शकटिका निमित्तं च तस्य प्रदत्तान्यलंकरणानि प्रत्सर्पयितुं तत्कथं चि
रयते ततः प्रविशति गृहीताभरणो विदूषकः पेसिदोम्हि अज्जचारुदत्तेण वसंतसेणा सआसं
तं हि अलंकरणानि गेण्हिअ जधा अज्जमित्ते अवसंतसेणाए वच्छो रोहिसेणो अलंकारेण अलं

एम०
८७

करिअज्जुणणीसआसंभेसिदोइमस्स आहरणंदारवरा उणगेण्हिदव्वं तासमप्पेहिन्तिताजावव
संतसेणासआसंतेघगच्छामि परिक्रम्यावलोक्यच आकाशेकधंभावरेभिलः भोभावरेभिल किंणि
भिन्नंतुमंउच्चिग्गोउविग्गोविअलक्खीअसि आकर्ण्यकिंभणासिपिअवअस्सोचारुदत्तोअधि
आरणमंडवंसद्दावीअदित्तिजाणाअप्पेणकज्जेणहोदव्वंविचिंत्य तापच्छावसंतसेणासआ
संगमिस्संअधिअरणमंडवंदावगमिस्संपरिक्रम्यावलोक्यच इदंअधिअरणमंडवंताजावपविसामि
प्रविश्यसुहंअधिअरणभोइआणकहिंपमपिअवअस्सो अधि नन्वेषतिष्ठति धिदवअस्ससो
त्थिदे चाहभविष्यतिविहअविक्वेवमंदे चारु एतदपिभविष्यतिविहभोवयस्सकिंणिमित्तं उ
व्विग्गोउव्विग्गोविअलक्खीअसि कुदोवासद्दाइदो चारु वयस्समयाखलुनृशंसेनपरलोकम
ज्ञानतास्त्रीरतिर्थ्याविशेषेणशेषमेषोभिधास्यति विद किं२ चारुकर्णेएवमेवंविद कोएव्वं

मृछः
८८
८९

भणादि चारुसंन्नपाशकारं दर्शपतितन्त्वेषतयस्त्रीहेतुभूतः कं तातोमांमाहरतिविदू जनांतिकं एहंकी
सणाभणीअदिगेहंगदत्ति चारु उच्यमानमपिअवस्यादोषात्रगत्स्यतेविदू भोभो अज्जाजेणदा
वपुरच्छावणविहारारामदेउल्लतडागकूवजूवेहिं अलंकिदाणअरीउज्जअणीसोअणीसोअ
त्थकल्लवत्तेकारणादोइंदिसंअकज्जं अणुचिट्ठदित्ति सक्रोधं अरेरेकाणेलीसुदाराअसालसं
ठाणाआदुस्संखणआकिदजणदोसभंडआवहुसुवस्समंडिदमक्कडअभण२ममअणादोजोदा
णिंममपिअवअस्सोकुसुमिदंमाधवीलदंपिआअट्ठिअकुसुमावचयंणाकरेदिकदाविआअ
द्दन्नाए पल्लवछेदंतुभोदित्तिसोकधंएरिसं अकज्जंउहअलोअविरुद्धंकरेदि चिट्ठरेकुद्दणिउत्ताजावस
दिणातवहिअअकुडिलेणदंडअदंणपत्यअंरेसदखंडंकरेमि शकारः सक्रोधं सुणंतु२ अज्जामि
स्सा चारुदत्ताकेणशहममविवादेववाहालेवातकीशएशेकाकपदशाशमस्तकादुच्छवदुघकाममम

एम·
८८

शिलेशद्दखंडेकल्ले दिमादावलेदासाए उत्ताडुदुष्टवडुअका विदू० दंडकाष्ठमुद्यम्य पूर्वोक्तिं पठति शकारः स
क्रोधमुत्थाय ताडयति विदू० मत्तीपं ताडयति अन्योन्यं ताडयतः विदूषकस्य कक्षादेशादाभरणानि पतं
ति शकारः तानि गृहीत्वा दृष्ट्वा ससाध्वसं पेक्खंतु अज्जा एदे खु ताए तवस्सिणीए केलका अलंकाराए चारु
दत्तमुद्दिश्य इमश्शा अत्थकल्लवत्तस्स कालणाद् एशा मालिदा वावादिदा अ० अधिकृताः सर्वे अधो
मुखास्थिताः चारु जनांतिकं अयमेवंविधे काले दृष्टो भूषणविस्तरः अस्माकं भाग्यवैषम्यात्प
तितः पातयिष्यति विदू० भो कीश भूदत्थं ण णिवेदेदीयदि चारु वयस्य दुर्वलं नृपतेश्चक्षुर्नैतत्तत्त्वं नि
रीक्षते केवलं वदतो दैन्यमश्लाघ्यं मरणं भवेत् अधिक० कष्टं भोः कष्टं अंगारकविरुद्धस्य प्रक्षीणस्य बृ
हस्पतेः ग्रहोयमपरः पार्श्वे धूमकेतुरिवोत्थितः श्रेष्ठी विलोक्य वसंतसेनामातरमुद्दिश्य अवहिदा
दाव अज्जा एदं सुवस्सभंडअं अवलोअदु सो जेव्व एसो ण वेत्ति हद्धा अवलोकसरिसो एसो एसो ण उ

णसो शकारः ओंवुद्धकुट्टणि अकवीहिंमंतिदंवा आसम्हकिदं हद्धा हदासअवेहि श्रेष्ठी अममतंक
धेहि सोजेद्यएसोणवेत्ति हद्धा अज्जुसिप्पिकुसलदास ओवंधेदिदिट्ठिंणउणसो अधिकरणिकः भद्दे
अपिजानासेतान्याभरणानि हद्धाणंभणामिणाहु २ असमदो अहवाकदाविकेणविसिप्पिणाद्यहिदे
भवेअधि पश्यश्रेष्ठिन् वस्त्वंतणीणसदशानिभवंतिनूनंरूपसन्षणगुणसचकृत्रिमसदृष्ट्वाक्रि
यामनुकरोतिहिशिल्पिवर्गःसादृश्यमेवहृतहस्ततयाचदृष्टं श्रेष्ठी अज्जुचारुदत्तस्सकेरकाणिए
दाणि चारु नखलु २ श्रेष्ठी ताकस्स चारु इहात्रभवत्यादुहितुः श्रेष्ठीकधंएदाइंताएविओअं
गद्धाइं चारुएवंगतानिओइदं श्रेष्ठी अज्जुचारुदत्तएत्थसच्चंवत्तद्धंपेक्ख २ सच्चेणसुहंखुलंभ
इसच्चालावेणहोइपावए सच्चंतिउवेविअकवलामासच्चं अलिएणगूहेहि चारुआभरणान्याभ रणम॰
रणानीतिनजानेकिंचस्मद्गृहादानीतानीतिजानेशकारःउज्जाणंपवेशिअपटमंमालेशिकवड

कावडिआएसंपदंणिगूहेशि अधिआर्यचारुदत्तसत्यमभिधीयतां इदानीसुकुमारेस्मिन् निःशंकं
कर्क्कशाः कशाः तवगात्रेपतिष्यंतिसहास्माकंमनोरथैः चारु अपापानांकुलेजातेमयियायंनवि
घते यदिसंभाव्यतेपापंअपायेनचकिंमया स्वगतं नचमेवसंतसेनाविरहितस्यजीवितेनकृत्यं प्रका
शं भोः किंवहुनाममपाकिलनृशंसेनलोकद्वयमज्ञानतास्त्रीरतिश्चविशेषेणशेषमेषोभिधास्यति श
कारः वावादिदा अलेतुमंपिभणामएवावादिदेत्ति चारुदत्तः त्वयैवोक्तं शकारः शुणेध२भट्टाल
काएदेणमालिदाएदेणअंहगेशंशएछिन्नेएदश्शदंलिद्दचारुदत्ताहशलीलेदंडेधालीअउ अधिशो
धनकयथाहरणष्टिपः भोराजपुरुषागत्यतामपंचारुदत्तः राजपुरुषागत्यहंतिरूवायसीदंतुयसीदंतु
अजुमिस्सानोदावचोरेहिं अवहदस्स इत्यादिपूर्वोक्तंपठतिताजदिवावादिदामममदारिआवावादि
दाजीवदुमेदीहाऊ अस्मंचअत्यिपद्यथिणंववहारेणअअहंअत्यिणीतामुंचधएदंशकारः अ

मृच्छ:
९०
९८

वेहि गव्वदासिगच्छ किंतवराइदिणा अधि आर्यैगम्मतां हेराजपुरुषा निः क्रामपतेनं हृद्धा हाजादहापु
त्तअ इति रुदती निः क्रांता: शकार: स्वगतं कडंमस्स एदस्स अत्तणोसलिसंसंपदंगच्छामीति निः क्रांत: अ
धिक आर्यचारुदत्तनिर्णये वयंप्रमाणं शेषेनुराजा तथापि शोधनक विज्ञाप्यतां राजापालक: अयंहि
पातकी विप्रो नवध्योमनुरब्रवीत् राष्ट्रादस्मात्तु निर्वासो विभवै रक्षतै: सह शोधनं अज्जो आणवेदि
इति निः क्रम्यपुनः प्रविश्य सास्रं अज्जा गदम्हि तहिं लाआपालं तुभणादि नेण अत्थकल्लवत्त शश
कारणादो वशं तसेणावावादिदा तं तहिं ज्जेव्व आहलणाइं गले वंधिअ डिंडिमं ताडिअ दक्खिणमसा
णं णाइअ शूले भज्जेधत्ति जो को वि अवरो एरिसमकज्जमणुचिच्छदि सो एदिणा सणिआरंदंडेण सासीअदि
चारु अहो अविवेको ऽविमृष्यकारी राजापालक: अथवा ईदृशे व्यवहाराग्नौ मंत्रिभिः परिपातिता: सा
नेखलुमहीपाला गच्छंति कृपणां दशां अपिच ईदृशै: श्वेतकाकीयै: राज्ञ: शासनदूषकै: अपापानां

सा ३

राम.
९०

सहस्राणिहन्यंतेचहतानिच सखेमैत्रेयगच्छ मद्वचनादंबामपश्चिमपश्चिममभिवादयस्व पुत्रंचमे
रोहसेनंपरिपालयस्वविदू मूलेछिन्नेकुदोपादवस्सपालणं चारु मामैवंनरणांलोकांतरस्थानांदेहम
तिकृतिःसुतःमयियोयस्तवस्नेहोरोहसेनेसयुज्यतां विदू भोवअस्सअहंतेपिअवअस्सोभीवअनुए
विरहिदंपाणाइंधारेमि चारु रोहसेनमीयतावद्दर्शय विदू एवंजुज्जदि अधिभद्दशोधनकअपसा
र्यतामयंवद्भिः शोधनथाकरोति अधिकःकोत्रभोश्चांडालानांदीयतामादेशः इतिचारुदत्तंविसर्ज्य
निःक्रांताःसर्वेराजपुरुषाः शोधनकः इदोआअच्छदुअज्जो चारु सकरुणं मैत्रेयभोःकिमिद
मित्यादिपठति आकाशे विषसलिलतुलाग्निप्रार्थितेमेविचारेक्रकचमिहशरीरेवीक्ष्यदातव्यमद्य
॥अथरिपुवचनाद्वाब्राह्मणंमांनिहंसिपतसिनरकमध्येपुत्रपौत्रैःसमेतः अयमागतोस्मीतिनिः
क्रांताःसर्वे॥ ॥व्यवहारोनामनवमोंकःसमाप्तः॥ ॥९॥ ॥ततःप्रविशतिचांडालद्वयं, नानुगम्य

91

मानश्चारुदत्तः उभौ तक्किं ण कल अकालणएण वव्वहवंधणं अणे णि उणा अइल्लेणसी । सद्धेअण
हल्लालोवेसुकुशलम्ह । ओशलध आज्ञानुशलध एशे अज्जुचारुदत्ते दिस्सकलवीडट्टामे गहिदे
अम्हेहिं वज्झपुलिसेहिं दीवेद्यमंदणेहे थोअं थोअं खअं जाइ चारु सविषादं नयनसलिलसिक्तं
पांसुरुक्षीकृतांगं पितृवनसुमनोभिर्वेष्टितं मे शरीरं विरसमिह रटन्तो रक्तगंधानुलिप्तं बलिमिव
परिभोक्तुं वायसास्तर्कयंति चांडालौ नुशलध अज्ञानुं शलध किं पेक्खध छिज्जुं तं तेशप्पुलिशं काल
परशुधाराहिं भुअणस्स उणाधिवाशं शज्जुणपुलिशदुमं एदं आअच्छले चालुदत्ता आअच्छ । चा
रु पुरुषभाग्यानामचिंत्याः खलु व्यापाराः यदहमीदृशीं दशामनुप्राप्तः सर्वगात्रेषु विन्यस्तै रक्तचं
दनहस्तकैः पिष्टचूर्णावकीर्णश्च पुरुषो हं पशूकृतः अग्रतो निरूप्य अहो तारतम्यं नराणां सुकरु
णं अमी हि दृष्ट्वा मदुपेतमेतन्मर्त्ये धिगस्त्विति सुपजातवाष्पाः अशक्नुवंतः परिरक्षितुं मां स्वर्गं लभस्वे

जिवदंतिपोराः चांडालो नुश्शलध अज्जा नुश्शलध किंपेक्खध इदे पवाहिअंते गोप्पशवेशं कमं
च तालाणं अपुरिशयाणविपत्तीचन्नालि इमेण द्वब्बाएकः हंडे आहीनायेक्खणअलीपधा
णम्हे देवमाअं नेकदंत्त अस्माए किंलुअदिअं नलिकेवआदु अणम्वेपड दिवेज्जे द्वितीयः अलेगो
हाण अलुअदिअं नलिकेवणे अ अणम्वेपड दिवज्जे महिलासमूहमेहे निवडइण अणमुधा
णहिं अविअ वक्कम्मिणीअमाणेजणाश्श शद्दश्शालोद्माणश्श णअणशलिलेहिं सित्तेल
ग्घादोणउस्समइलेण चारु निरूप्पसकरुणांएताः पुनर्हर्म्यगताः स्त्रियो मां वातायनार्द्धेन
विनिःसृतास्साः हा चारुदत्ते त्यभिभाषमाणा वाष्पप्रणालीभिः विोत्सृजंति चांडालो अ
अग्छले चालुदत्ता आअच्छ इमं घोसणद्वाणं आहणेध डिंडिमं घोसेध घोसणं उभो सुण
ध अज्जा अ सुणाध एशे शत्थवाहविणअदत्तश्श णत्तिके शाअलदत्तश्श पुत्तके अज्ज चारुदत्ते

णामएदिणा किल अकज्जकालिणागणिआवशं तशेणाअलकल्लवत्तशशाकालणादोमुस्सपुप्फ
कलंडअजिणउज्जाणंपवेशिअबाहुपाशवलक्कालेणामालिअत्तिएशेशलोत्तेगहिदेशअं अपडि
वसेतदोलस्सापालएणाअम्हिआणत्ताएदंमालेदुंजदि। अवलेईदिशेउभअलोअविलुइं अ
कज्जंकलेदितंपिला आपालएएवंजुत्तेद्वशाशदि चाह सनिर्द्धेदंस्वगतं मरवशतपरिभूतंगेत्र
मुम्दासितंमेसद्सिनिविडचेतबद्धघोषैः पुरस्तात् ममभरणाद शापांवर्त्तमानसपायैस्तद
सदृशमनुष्येर्हुष्यते घोषणायां उद्धीक्ष्य कर्णौपिधायहाप्रियेवसंतसेने शशिविमलमयूख
शुभ्रदंतिसुरूह चिरविद्रुमसन्निभाधरोष्ठि तववदनभवामृतंनिपीयकथमवशोह्यपशोविषंपि
वामिउभो तुंशलधअज्ञार्त्तुंशलधएशेगुणालअणाणिहा सज्जणादुकवाणउत्तलणासेहूअ एम·
भुवस्समंडणअंअवणीअदिअजणअलीदो असंभव सद्देकवुहोइलोएलोएमुहसंथिदाण ९२

तत्तिल्ला विणिर्वाडदाणणलाणंमच्च्अआलीदुल्लहोहोदि चारु सर्वतोवलोकअमीहिवस्तांतर
रुद्धवक्त्राः प्रयांतिमेहृदन्तरंवयस्याः परोपिवंधुस्समसंस्थितस्यमित्रंनकश्चिद्विषमस्थितस्य चां
डालो तुंशालणांकदंविवत्तलाअमणोत्ताआणेधस्सदंदिस्सवज्झ्चिराहं चारुनिःश्वस्यमैत्रेयभोः
किमिदमित्यादिपठति नेपथ्ये हातातहापिअवअस्स चारु आकर्ण्यसकरुणंभोःस्वजातिमह
तरइच्छाम्यहंभवतस्सकाशात्प्रतिग्रहंकर्तुं चांडालो किंअम्हाणंअहत्यादोयडिगाहंकलेसि चा
रुशांतंपापंनायरीच्छिन्नकारीदुराचारःपालकइवचांडालः तत्परलोकार्थंपुत्रमुखंद्रष्टुमभ्यर्थ
ये चांडालोएहंकरीअड नेपथ्येहातादहाआवुक चारु श्रुत्वासकरुणंभोःस्वजातीत्यादिपठ
ति० चांडालोअलेआअच्छदु अपरः आअच्छदु उभौ २ पउलाखणं २ अंत्तलंदेधएशेअ
उचारुदत्तेपुत्तमुखंप्पेक्खदु नेपथ्याभिमुखंअज्जइदो आअच्छलेदालआआअच्छ ततः प्रवि

शतिदारकमादायविदूषकः विहू नुवरङरभदमुहोपिदादेभारिदुंणीअदिदारकः हा आवुका हा ताद
विहहा यिअवअस्तकहिंमरणतुमंयेकिवदद्यो चारु पुत्रंमित्रंचवीक्षहा पुत्रहामैत्रेयसकरुणंभोः
कष्टं चिरंखलुभविष्यामिपरलोकेपिपासितः अत्यल्पमिदमस्माकंनिवापोदकभोतनं किंपुत्राय
प्रयच्छामिआत्मानमवलोक्ययज्ञोपवीतंदृष्ट्वाओं इदं तावदस्तिममच अमौक्तिकमसौवर्णंब्राह्म
णानांविभूषणंदेवतानांपितॄणांचभागोयेनप्रदीयते इतियज्ञोपवीतंददाति चांडालः आअ छे
ले चारुदत्ता आअच्छ द्वितीयः अलेअज्जचालुदत्तेणिलुववदेशणमेणआलवेशि अलेप्पेकव
अभ्युदयेअवसाणेतहअलत्तिंदिवंअहदमग्गा उद्दामेव्वकिशोलीणिअदीकवुपडिच्छिदुंजादि
असंमंच मुखावववदेशशेकिंपणामिअमशत्तएणका अघंलाहुगाहिदेविअचंदेणवंदणीर्नुजण
पदृष्यावालकः अलेअलेचंडालाकहिंआवुकंणेध चारु वत्स असे नविमक्करवीरमालांस्कंधे

नम्ह्लंहृदयेनशोकं आघातमघाहमनुप्रयामिश्शामित्रमालघेईवाध्वरेञः चांडालः दालआराणहुअ
म्हेचंडालाचंडालउलम्मिजादपुव्वावि जेअहिमवंजिसाहुंतेपागतेअचांडालादारकः ताकीसमा
लेधआवुकं चांडालः दीहार्तुअत्तलाअणिओर्नुकवु अवलम्हादिणकअम्हे दारकःवावादेधमं
मुंचधआवुकं चंडालः दीहार्तुएद्यंभणत्तेचिलमेजीव चारु साहलपुत्रंकंठेगहीवाइदंतत्सेहस
वंस्वंसममाघदरिद्रयोः अचंदनमनोशीरंहृदयस्यानुलेपनंअसेनविभ्रदित्यादिपुनःपठतिअ
वलोक्यस्वगतं अमीहिवस्त्रांतनिरुद्धवक्राइत्यादिपुनःपठतिविहू मोभद्मुहापुंचेर्धांपअवअ
स्संचारुदत्तंमंवावादेध चारु शांतंपापंदृष्ट्वास्वगतंअघावगच्छामिसमस्थितेत्यादिपठति प्रका
शं एताः पुनर्हर्म्यगतास्त्रियोमामित्यादिपुनःपठतिचांडालः नुंशलधअज्ञार्नुशलध किंप्पेकव
धशाप्पुलिशंअतशावशेणप्पणावजीवाशं रूवम्मिकवडिदयाशककंचणाकलशव्वुघत्तं चा

मृच्छः
९४

94

रु सकरूणं पाणिविमलमङ्खेत्यादि पठति अपरः अलेपुणोविग्धोसेहि चांडालः तथाकरोति चा
रुदत्तः आर्योहंमसनकृतांदशापनायंपित्रेदंफलमपिजीवितावसानं एषाचअध्ययतिघोषणामनो
मेश्रोतव्यंयदिदमसौत्वयाहतेति ततः प्रविशतिप्रासादस्थोवद्धः स्थावरकः घोषणामाकर्ण्यसवै
क्लव्यं कधं अपावेचारुदत्ते वावादीअदि हगेणिअलेणशापिणावंधिदेभोदु अक्कंदामि सुणा
ध अज्जासुणाध अस्तिदाणिंमएपावेणपवहणपडिवत्तेणपुष्पकरंडअजिणुज्जाणं वशंतशेणा
णीदा तदोममशामिणामंणकामेशित्तिकदुअवाहुपाशवलक्कारेणमालिदाणउणएदिणा अज्जो
ण कधंविहलदाएणकोविसुणादिता किंकलेमिअत्ताणअंपातेमिविचिंत्य जदिएव्वंकलेमितदा
अज्जचारुदत्तोणवावादीअदिभोदुइमादोपाशादवाडग्गापदोलिकादोएदिएजिस्सगवक्केणअत्ताण
अंणिक्खिवामि वलंहगेउअलदेणउणएशेकुलउत्तविहगाणंवाशपादवे अज्जचारुदत्तएव्वंय

मृ·
९४

दिविवज्ज्ञामि लञ्छमणपललोए इत्ता त्मानंपातपिवाहीणउवलदम्हि भगोमेडंडाणिअडे ताचंडा
लघोसंसमस्सेसामि इक्ष्वूपसूतस हंहो चंडाला अंतरं २ चांडालो अलेके अंतल अंमगोदि चे
टः भूएवंनु इतिपूर्वोक्तंपठति चारुदत्तः अपेकोयमेवंविधेकालेकालपाशस्थिते मयि अनादृ
ष्टिहतेसस्येद्रोणमेघइवोच्छ्रितः मोश्रुतंभवद्भिः नभीतोमारणादस्मिकेवलं दूषितंयशः विशुद्धस
हिमेमृत्युः पुत्रजन्मसमोभवेत् अस्यचतेनास्मकृतवैरेणक्षुद्रेणाल्पाल्पबुद्धिनाशरेणेवविषा
क्तेन दूषितेनापिदूषितः चांडालोथावलअअविसच्चंभणासिचेटः सच्चंहगेविमाकश्शविकध
इश्शशित्तिपाशादवालगापदोलिकाएदंडाणिअलेणवंधिअणिविन्ते प्रविश्यशकारः शकारः स
हर्षं मंशेणतिकवाविलकेणभत्तेशाकेणशूपेणसमश्छकेणभुत्तं मए अत्तणअस्सगेहेशालि
श्शाकूलेणगुलोदणेण कर्स्मंदत्वा भित्रखसस्वंवलणाएचंडालवायाएशलशंजोएजधअ एशेउ

एकालिदेवङ्गडिंडिमसद्दे पडहाणञ्ञ झुणीअ दिंतधात्तकेमि दलिद्दचालुदत्ताकेवज्झट्ठाणंणीअ
दिन्ति ताफे रिकस्संसत्तु दिणाश्रोणाममहं तेहल अ श्श पडिदो शे होदि सुदं वमएजे विकिलसत्तुं वावा
दयंतं पेरक दितश्श असमश्शिंजं मं तलेअ किवलो गेण होदि मसरकु विधगंठिगन्वयविद्वेणविञ्
कीडएण किं विअं तलं मग्गमाणेण उप्पाडिदे ता हदलिद्दचालुदत्ताह विणासेंपदं अ त्तणाके लि
काए पशादवालग्गापदो लिआ एअहिलुहिअ अ त्तणो पडक्कामं येरखामि तध्याक्त्चा दष्टुाचहो
एदाहदलिद्दचालुदत्ताहवडंणी अमाणाहएशेवहेजणासम्महंवेज्ञेलं अम्हालिशे पवडेवडमा
णुश्शेवज्झं णीअ दिंतं बेलेकीदिशंभवे निरीह्स कधं ऐशेशेणववलहके वि अ मं डिदे दह्रिणंदि
शं णीअ दि॰ अध किं णिमित्तं ममके लिकाएपाशादवालगायदोलिकाएसमीवे घोषणाणिवडि
दाणिवालिदाअ विलोक कधंष्यावडकेचेडे विणात्यिइधमाणामत्तेणइदोगहुअ पंतमेदेकडे

भवीपदि ताजावणं अस्सेशामि इति अवनीये पिसर्प्पति चेटः हद्धी भद्दालका एशे शे आगडे चा
डालो कुशलधदेध मगं दालं ढक्केध होध तुराही आ अविणा अतिकवविशाणं दुद्दवइल्ले इदो
एदि शकारः अले अले अंतलमंतलं देध उपस्त्त पुत्तका थावडका वेडा एहि गच्छम्ह चेटः ही
अणज्जवसंतशेणिअं मालिअ णपलिनुट्ठेशि शंपदं पणाइजणकप्पपादपं अज्जुचारुदत्तं माल
इदुं ववशिदेशि शकारः णाहिलदणाकुंभशलिशे हगे इत्थिअं वावादेहि सर्वे अहो तु एमालिदाण
अज्जुचारुदत्तेण शकारः के एव्वं भणादि सर्वे चेटमुद्दिश्य णं एसो साहू शकारः अपवार्य सभ
यं अविदमादिके २ कधं थाचडयचेडे सुघुणमएशंजदे एशे कवु मम अकज्जश्श शक्खी विचिं
त्य एव्वं दाव कलइश्शं प्रकाशं अलिअं भद्दालका हो एशे चेले मुवस्मचोलिआए मए गहिदे पि
ट्टिदे यालिदे वड्ढे अताकिदवेले एशे जं भणादि किं शाचं सच्चं अयवारितकेन चेटस्स कटकं प्रयच्छ

मृछः
९६
५६

त्तिस्सेरकंपुशन्तकाथ्यावडकचेडाएदंगेन्हि अअस्सधामणाहि चेटः गृहीत्वापेक्खधम्मदालकाहे
सुवस्सेणमंपलोभेदि शकाकटकमाछिद्यएशेशेभुवस्सके ज शशकारणा मएवट्ठु सक्कोधं हंहो
चंडालामएखुएशेभुवस्समंडालेणिउत्ते भुवस्सेचोलअत्तेमालिदे पिहिदे तातद्दिणपत्ति आअ
धत्ताधिहिंदावपेक्खधचांडालो दृष्ट्वासोहणंभणादि विडत्तेचेडे किंणप्पडवदि चेटः हीमादिके
ईदिशेदासभावेजंशद्धकंपिणपत्तिओइअदि सकरुणं अज्जचारुदत्तएत्तिकेमेविहवे इतिपा
दयोः पतति चारुदत्तः सकरुणं उत्तिष्ठ भोः पतितसाधुजनानुकंपिन् निःकारणोपगतबांधव धर्मशी
लयत्तःकृतोपि सुमहान्ममसोच्दणाय दैवं न संवदति किंनकृतं चयाघचांडालो भद्दके पिहिअस
दंचेडअं णिरकालेहि शका णिश्शलले इतिनिर्वासयति शकारः अले चंडाला किंचिलं कधं मा
लेधएदं चांडालो यदि तुवलशि तासायंजेव्व मालेहि शेह अलेचंडालामंमारेध मुंचधआवुकंशा

रम·
९६

का शपुत्तं जेव्व एदं मालेध चारु सर्वमस्यमूर्खस्य संभाव्यते तत् अछपुत्त्रमातुः समीपं रोह किं मए गदेण
कादव्वं चारु आम्रमंवस्रगंतत्वं गृहीत्वा धेवमातरं मा पुत्र पितृदोषेण त्वमप्येवं गमिष्यसि तद्वय
स्य गृहीत्वैनं व्रज विदू भो वअस्स एव्वं तुए जाणिदं तुए विणा अहं पाणाइं धारेमि त्ति चारु वयस्य स्वा
धीन जीवितस्य न युज्यते तव प्राणपरित्यागः विदू स्वगतं जुत्तं णेदं तधा वि णास क्कुणोमि पिअवय
स्स विरहिदे पाणाइं धारेदुं त्ति ता वं म्हणीए दारअं समप्पिअ पाणपरिच्चाएण अत्तणो पिअवअस्स
मणुगमिस्सं प्रकाशं भो वअस्स पएणोमि एदं लहुं इति सकंठग्रहं पादयोः पतति दारकोपि रुदन्
पतति शका अले णं भणामि शपुत्ताकं चालुदत्ताकं वावादेध त्ति चारु भयं पनाटयति चांडा अले ण
हि अम्हाणं ईदिशी लाआणत्ती जधा शपुत्तं चारुदत्तं वावादेध त्ति ता णिरक्कमले दालआ इति निः
क्रामयतः चंडा इमं तइअं घोसणाट्ठाणं ता डेध डिंडिमं पुनर्घोषयतः शका स्वगतं कधं शेण

पत्तिआअंति पोला: प्रकाशं हं हो चारुदत्ता चदुब्बकाणायत्ति आअदिएशे पोलजणो ता अत्तणाके
लिकाएजीहाएभणाहि मएवशंतशेणिआमाएदिदेति चारु तत्स्मीमास्ते शकार: अलेचंडालाणो
हेणाभणादि चारुदत्तवुडुच्चके ताभणावेध इमिणाजज्जरवंशखंडेनशंखलेणतालिअ चंडाल:
प्रहारमुधम्म भोचारुदत्तभणाहि चारु सकरुणं प्राप्येतद्यसनमहार्णवप्रपातंनत्रासोनचमन
सोस्तिमेविषाद: एकोमां दहति तनायवादवह्निर्वक्ति मंपदिहमपाहत्ताप्रियेति शकार: पुनस्त
थैव चारु भोभोपौरा: मपाखलुनृशंसेनेत्यादिपुन: पठति॥ शकार:॥ वावादिदा॥ चारु एव
मस्तु॥ चांडाल:॥ अले॰ तववभवेलिआ॰ द्वितीय:॥ अले॰ तव॰॥ प्रथम अले २ लेकवत्ते॰ क
लेह्म॰॥ इतिवहुविधंलेखकंकृत्वा॥ प्रथम:॥ अलेजदि॰ मम॰ केलिकावज्झवालिआ॰ ता॰ चिठ्ठदु॰ एम॰
दावमुहुत्तअं॥ द्वितीय:॥ किं॰ णिमित्तं॥ प्रथम:॥ अले॰ भणिदो॰ ह्मि॰ पिदुणा॰ सग्गंगच्छंतेण॰ ज

घापुत्त·वीअर·जइ·तुह·वक्षवाली होदि·माशहशावावदी अशि·वज्झं·॥द्वितीयः॥ अले·किं·णि
मित्तं·॥प्रथमः॥कदा·वि·को विशाहू·अत्थंदपि अव ज्झं मोआवेदि कदा·वि·लस्लोः पुत्ते॥ भोदि·
तेण·बद्धावेण·शव्ववक्षाणं·मोक्खो·भोदि·॥कदा·वि·हत्थीवंधं·खंडेदि·तेण·शंभ्रमेण·वज्झे·
मुक्के होदि·कदा·विलाअपडिवत्ते·होदि·तेण·शव्ववक्षाणं·मोक्खो·भोदि॥शका॥किंलाअपडि
वत्ते·होदि·॥चांडालो·॥अले २ वक्षवालिआए·लेक्खअं·कलेह्म·॥शका॥ अले शिग्घं मालें
ध·चालुदत्तकं·॥इत्युक्त्वा चेटं गृहीत्वा एकांते स्थितः॥चांडालो·॥अज्ज·चारुदत्त·एआणि
ओकखुअवरक्षदि·ण·अह्ले चंडाला·ता·सुमरेहि·जं सुमरिदव्वं॥चारु॥प्रभवति यदि धर्मोदू
षितस्यापि मेद्य प्रवलपुरुषवाक्यैर्भाग्यदोषात्कथंचित्॥सुरपतिभवनस्थो यत्र तत्र स्थितो वा
व्यपनयतु कलंकं स्वस्वभावेन सैव॥भोः क्व तावन्मया गंतव्यं चांडालो·अग्रतो दर्शयित्वा अले

एदंदीशदि॰ दक्किवणामसाणं॰ जं॰पेक्किवअ॰ अज्ज॰वभा॰स्रत्ति॰पाणाइं॰मुंचेढुंति॰दीह॰गोमाअं॥
अद्द॰ विश्रूललगां॰वेशंमिवअदहाशश्शा॥चाह॥हाहतोस्मिमंदभाग्यः॥इतिसावेगमुपविशति॥
नेपथ्ये॰॥शकारः॥णदाव॥गमिश्शंचालुदत्ताकं॰वावादअंतं॰दाव॰पेक्वामि॰॥यरिक्राम्य॥दृष्ट्वा॥
कधं॰उवविट्ठे॥चांडालो॰॥चालुदत्ता॰किं॰भीदेशि॰॥चाह॥मूर्ख॥नभीरुर्मरणादस्मीत्यादिपठति॥चां
डालो॥अज्ज॰ चाहदत्त॰गअणतले॰पडिवसंता॰ चंदसुज्जावि॰विपत्तिं॰लहंति॰किं॰पुण॰जण॰
मलणभीरुआ॰माणवा॰वालो॰ए॰कोविउट्ठिहो॰पलदि॰कोवि॰पडिदो॰विडट्ठेदि॰उट्ठंतपडंताहव
शणपाडिआशद्वश्शा॰ उण॰ अस्थि॰एदाइं॰हि अए॰कदुअ॰संधालेहि॰ अत्ताणअं॰चंडालेप्र
नि॥एदे॰चउत्थअं॰घोसणत्थाणं॰ ता॰ उग्घोसत्स॥पुनस्तथैवघोषयतः॥चाह॥हाप्रियेव॰संतसे
ने॥शशिशकलमयूखेत्यादिपठति॰॥ततः प्रविशतिससंभ्रमावसंतसेनाभिक्षुश्च२भिक्षुः हीमा

णहे॥ अत्थाणपडिश्पंती-शमशाशिअ-वशंतशे-णिअंणअंतो अणुगाहिदं झि-पव्वज्जाए-उवा
शिके-कहि-तुमंणइश्शं॥ वसंतसेना॥ अज्जचारुदत्तस्स-जेव्व-गेहं-तस्स दंसणेण-मअलंछणस्स वि
अं-कुमुदिणिं आणंदेहि मं॥ भिक्षुः॥ स्वगतं॥ कदलेण-मग्गेण-पविशामि-विचिंत्य॥ लाअमग्गेण-
जेव्व-गच्छामि-उवाशिके-एहि-२२ मं-लाअमगं॥ आकर्ण्य किंस्सु-हु-एशे-लाअमग्गे-महंते-क
लकले-सुणीअदि-॥ वसंत॥ अग्रतो निरूप्य॥ कधं-पुरदो-महाअणसमूहो-अज्ज-जाणाहि-
दाच-किं-णेदं-त्ति-विसमभरक्कंता चिअ वसुंधराए अवासेणदा-उज्जइणी वट्टदि-॥ चंडालो-॥ इ
मं-अपच्छिमं-घोसणट्ठाणं-ता-ताडेध-डिंडिमं-उग्घोसेध-घोसणं॥ तथा कृत्वा॥ भो चारुदत्तपडि
वालेहि-मा-भाआहि-लहुं जेव्व-मालीअशि-॥ ॥ चारु॥ भगवत्यो देवताः॥ भिक्षुः॥ श्रुत्वा॥ ससं
भ्रमं॥ उवाशिके तुमं-किल-चारुदत्तेण-मालिदाशि त्ति-चालुदत्तो-मालिदुं णीअदि ससंभ्रमं॥ हं

दी २ कधं॰ मम॰ मंदभाइणीए॰ कदे॰ चालुदत्तो॰ वावादीअदि॥ भो॰ तुलिदं २ आदेसेहि॰ मग्गं॥ भि
त्थुः॥ तुवलदु २ वुड्ढोवाशिआ अज्जचालुदत्तं॰ जीवत्तं॰ शमश्शाशिदुं अज्जा॰ अंतलमंतलं देधः॥
वसंत॥ अंतलं २ चांडालो॥ अज्ज॰ चालुदत्त॰ सामिणिओ ॐ कवु॰ अवरद्धदि॰ ता॰ सुमरेहि जं सु
मरिदव्वं॰ चारु॥ किं॰ वहुना॥ प्रभवतीत्यादिश्लोकं पठति॥ चंडाल॰॥ खड्गमाकृष्य॥ अज्ज॰ चालु
दत्त॰ उत्ताणो॰ भविअ॰ समं॰ चिठ्ठ॰ एक्कपहालेणमालिअ तुमं॰ सग्गं॰ णेह्म॥ चारु॥ तथातिष्ठति॥
चंडालः॥ प्रहर्तुमीहते खड्गपतनं हस्तादभिनयन्॥ ही॰ कधं॥ आअछिदे॰ शलोशं॰ मुठ्ठीए॰ मुठ्ठि
णागहिदे॰ वि॥ धरणीए॰ कीशपडिदे॰ दालुणए॰ अशणिशंणिहे॰ खड्गे॥ जधा॰ एदं॰ संवुत्तं॰ त
धा॰ तक्केमि॰ ण॰ विवज्जत्ति॰ अज्जचालुदत्तेत्ति॰ भअवदि॰ शज्झवाहिणि॰ पशीद २ अवि॰ णामचा

लुदत्तश्श॰ मोक्खो॰ भवे॰ तदो॰ अणुग्गहिदं तुए॰ चंडालउलं॰ भवे॥ अपरः॥ जधा॰ णत्तं॰ अणुचिठ्ठ

स्ल॰॥प्रथमः॥भोदु॰एव्वं॰कलेम्ह॥इत्युभौचारुदत्तंशूले॰समारोपयितुमिच्छतः॥चारु॥प्रभवतीत्यादि
पुनःपठति॥भिक्षुः॥वसंतसेनाचदृष्ट्वाअज्जा॰माहाव २ अज्जाएसा॰ अहं॰ मंदभाइणी॰ जास॰का
रणादो॰एसो॰ वावादीअदि॰॥चंडालौ॥दृष्ट्वा॥तुलिदं॰काडण॰एसा॰ अंशपलंतेण॰ चिहुलभालेण॥
मामेत्ति॰वाहलंती॰ उट्ठिदहत्या॰ इदो॰ एदि॰॥वसंत॥चारुदत्त॰किंणेदंत्तिउरसिपतति॥भिक्षुः॥अज्जा॰
चारुदत्त॰किंणेदमितिपादयो॰पतति॥चांडालौ॥सभयमपसृत्य॥कधं॰वसंतसेणा॰णं॰क्खु॰ अम्हे
हिं॰साह॰णावावादिदे॰॥भिक्षुः॥उत्थाय॥अले॰जीवदि॰अज्जचारुदत्ते॥चांडालौ॥जीवदि॰वरिसस
दं॥वसंत॥सहर्षं॥पच्चुवजीविदह्मि॥चांडालौ॥ताजाव॰ जधासुवुत्तंतं॰लइणो॰ जस्सवाडगदस्सणि
वेदेह्म॥इतिनिष्क्रामतः॥शका॥वसंतसेनांदृष्ट्वासत्रासं॥हीमादिके॰केण॰गब्भदाशी॥जीवाविदा॰
उक्कंताई॰मे॰पाणाई॰भोदु॰पलाइश्शं॥इतिपलायते॥चांडालः॥अले॰णः॥अह्माणं॰लाआणत्ती॰जे॰

णासा॰ गणिआ॰ वावादिदा तं॰ मालेध॰ ता॰ लद्धिअसालअं जेव्व॰ अणेसंस॰ इतिनिष्क्रांतौ॥ चारु॥
सविस्मयं॥ केयमभ्युद्यतेशस्त्रेमत्सुवक्त्रागतेमपि॥ अनावृष्टिहतेसस्येद्रोणवृष्टिरिवागताः॥ अ
वलोक्य च॥ वसंतसेनाकिमियंद्वितीयासमागतासेवदिवःकिमित्थं॥ भ्रांतंमनःपश्यतिवाममेनां
वसंतसेनानमृताथसेव॥ अथवा॥ किंनुस्वर्गात्पुनःप्राप्तासाममजीवातुकाम्यया॥ तस्सारूपानु
रूपेणकिमुतान्येयमागता॥ वसंत॥ सास्रंउत्थाय॥ पादयोःपतति॥ अज्जचारुदत्तेसा॰ जेव्व॰ अ
हं॰ पावा॰ जाए॰ कारणादो॰ इअंतुए॰ असरिसी॰ अवत्था॰ पाविदा॰॥ नेपथ्ये॰॥ अच्चरिअं २ जीवदि
वसंतसेणा॰ इतिसर्वेपठंति॥ चारु॥ आकर्ण्य॥ सहसोत्थायस्पर्शसुखमभिनीयनिमीलिताक्षःस
वहर्षगद्गदाक्षरं प्रियेवसंतसेनात्वं॥ वसंत॥ साज्जेव्व॰ अहं॰ मंदभाआ॰॥ चारु॥ निरूप्यसहर्षं
कथंवसंतसेनैव॥ सानंदं॥ कुतोवाष्पांबुधाराभिःस्नपयंतीपयोधरौ॥ मयिमृत्युवशंप्राप्तेविद्ये

।वसमुपागता॥प्रियेवसंतसेने॥त्वदर्थमेतद्धिनिपात्यमानंदेहंत्वयैवप्रतिप्रतिमोचितंमे॥अहो
प्रभावःप्रियसंगमस्यमृतोपिकोनामपुनर्ध्रियेत॥अपिच॥प्रियेपश्य २ रक्तंतदेववरवस्त्रमि
यंचमालाकांतागमेनहिवरस्यथाविभाति॥एतेचवध्यपटहध्वनयस्तथैवजाताविवाहपटहध्वनिभि
स्समानाः॥वसंत॥अदिदक्खिणदाए·किंणेदं·ववसिदं·अज्जेण॥चारु॥प्रियेत्वंकिलमयाहते
ति॥पूर्वानुववैरेणशत्रुणाप्रभविष्णुना॥नरकेपततानेनमनागस्मिनियातितः॥वसंत॥संतं·
पावं।तेणम्हि·राअसालेण·वावादिदा·॥चारु॥भिक्षुंदृष्ट्वा॥अयमपिकः॥वसंत॥तेण·अण
ज्जेणवावादिदा·एदिणा·अज्जेण·जीवाविदं·म्हि॥चारु॥कस्त्वमकारणबंधुः॥भिक्षुः॥ण·पच्चभिआ
णादि·मंअज्जो·अहं·शे·अज्जस्श·चलणशंवाहचिंतए।शंवाहके·णाम·जूदिअलेहिं·गहिदे
एदाए·उवाशिआए·अज्जस्स·केरकेत्तिअलंकारएण·णिक्किदे·म्हि·तेणअ·जूदणिव्वेदेण·

शक्षशमणाके·संवुत्ते·हि·एशावि·अज्जा·यवहणा विपज्जाशेण। पुष्फकरंडकजिसुजाणं·
गद्दा·तेणअज्ज·अणज्जेण।ण·मं·वहुमणेशिति·वाहुपाशवलक्कालेणमालिदाअएदिठ्ठा·ने
पथ्थे॥कलकलः॥जपतिवृषभकेतुर्दक्षपज्ञस्यहंता तदनुजपतिभेत्ताषरामुखः क्रौंचशत्रुः
॥तदनुजयतिकृत्स्नांशुभ्रकैलासकेतुंविनिहतवरवैरीचार्यकोगांविशालां॥प्रविश्यसहसा
शर्विलकः २ हत्वातंकुनृपमहंहिपालकंभोराज्येद्रुतमभिषिच्यचार्यकंतं॥तस्याज्ञांशिरसि
निधायशेषभूतांमोक्ष्येहंव्यसनगतंचचारुदत्तं॥हत्वारिपुंतंवलमित्रहीनंपौरान्समाश्वा।
स्यपुनःप्रकर्षात्॥प्राप्तंसमग्रंवसुधाधिराज्यंराज्यंवलारेरिवशत्रुराज्यं॥अग्रतोनिरूप्य॥भव
त्तत्रतेनभवितव्यं॥यत्रायंजनपदसमवायः॥अपिनामायमारंभः॥क्षितिपतेरार्यकस्यचारु
दत्तसजीवितेनसफलःस्यात्॥त्वरिततरमुपसृत्य॥अपयातजाल्माः॥दृष्ट्वासहर्षं॥अपि

धिपतेचारुदत्तः सहवसंतसेनयासंपूर्णाः खल्वस्मत्स्वामिनोमनोरथाः दिष्ट्याभोव्यसनमहा
र्णवादपारादुत्तीर्णंगुणाढ्यंतपासुशीलवत्ता॥ नावेवप्रियतमयाचिरान्निरीक्षेज्योत्स्नायेवशशि
नमिवोपरागमुक्तं॥ तत्कथमिवैनमुपसर्पामि॥ अथवा॥ सर्वत्रार्जवंशोभते॥ प्रकाशं॥ उपसृ
त्य॥ वद्धांजलिः आर्यचारुदत्त॥ चारु॥ ननुकोत्रभवान्॥ शर्वि॥ येनतेभवनंभित्वान्यासापह
रणंकृतं॥ सोहंकृतमहापापस्त्वामेवशरणंगतः॥ चारु॥ सखेमैवं॥ त्वयासौप्रणयःकृतइति
कंठेगृह्णाति॥ शर्वि॥ अन्यच्च॥ आर्यकेनार्यवृत्तेनकुलंमानंचरक्षता पशुवद्यज्ञवाटस्थोदुरा
त्मापालकोहतः॥ चारु॥ किं॥ शर्वि॥ त्वद्यानंप्र.समारुह्यगतःत्वांशरणंपुरा॥ पशुवद्वित
तेयज्ञेहतस्तेनाद्यपालकः॥ चारु॥ शर्विलकयोसौपालकेनघोषादानीयनिःकारणंगूढा
गारेवद्धः आर्यकनामात्वयामोचितः॥ शर्वि॥ यथाहतत्रभवान्॥ चारु॥ प्रियंनःप्रियं॥ शर्वि॥

प्रतिष्ठितमात्रेण तव सुहृदा आर्यकेण उज्जयिन्यां वेणातटे कुशावत्यां राज्यमतिसृष्टं तत्प्रतिमा
न्यतां प्रथमः सुहृत्प्रणयः ॥ परिवृत्य ॥ अरे २ आनीयतामयं पापो राष्ट्रियशठः ॥ नेपथ्ये ॥ यथाज्ञा
पयति शर्विलकः ॥ शर्विलकः ॥ आर्य ननु एवमार्यको राजा विज्ञापयति इदं मया युष्मद्गुणोपार्जि
तं राज्यं तदुपयुज्यताम् ॥ चारु ॥ अस्मद्गुणोपार्जितं राज्यं ॥ नेपथ्ये ॥ अरे रे राष्ट्रियश्यालक एह्ये
हि स्वस्याविनयस्य फलमनुभव ॥ ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्बाहुबद्धः शकारः २
हीमादिके ॥ एवं दूलमदिक्कंते · उद्दामे · गद्दहे विअ · ॥ आणीदे कवु · हगे · बद्धे · हुडे · अस्मे ब
क्कले ॥ दिशोवलोक्य ॥ शमंतदो · उवट्ठिदे · शेलट्ठिअवंधे · ता · कहिं · दाणिं । अशलणे · शलणं ·
पवज्जामि ॥ विचिंत्य ॥ भोदु · तं · जेव · अब्भुववस्मशलणालकवशं · शलणं · प्रच्छामि · ॥ उ
पसृत्य शकारः २ अज्ज · चालुदत्त पलित्ताहि २ इति पादयोः पतति ॥ नेपथ्ये ॥ अज्ज · चालु

दत्त · मुंच २ वावादेत्थ · २ दं ॥ शका ॥ भो · अशलणा · शलणे · पलित्ताआहि ॥ चारु ॥ सानुकंपं । अ
ह ह अभयमभयं शरणागतस्य ॥ शर्विलकः ॥ सावेगं ॥ आः अपनीयतामसौ चारुदत्तपार्श्वात् ॥
चारुदत्त भ्रतिननूच्यतां किमस्य पापस्यानुष्ठीयतामिति ॥ आकर्षं तु मुवध्वेनं श्वभिः संखाद्यता
मथ ॥ शूले वा तिष्ठतामेष पाट्यतां क्रकचेन वा ॥ चारु ॥ किमहं यद्ब्रवीमि तत्क्रियते ॥ शर्वि ॥ कोत्र
संदेहः ॥ शका ॥ चालुदत्त · शलणागदं हि · पलित्ताआहि २ जुत्तं · तुम्हसलिसं · तं कलेहि · पुणो
ण · ईदिश्शं ॥ नेपथ्ये ॥ पौराः ॥ वावादेध · किं · णिमित्तं · पातकी जीवावीअदि ॥ वसंत ॥ चारुद
त्तस्य कंठाद्वध्यमालामपनीय शकारस्योपरि क्षिपति ॥ शका ॥ गम्भदाशि · पशीद · २ ण · पुणो ·
मालइश्शं ता · पडित्ताआहि ॥ शर्वि ॥ अरे रे अपनयत आर्य चारुदत्ताज्ञाप्यतां किमस्य पाप
स्यानुष्ठीयतां ॥ चारु ॥ किमहं यद्ब्रवीमि तत्क्रियते ॥ शर्वि ॥ कोत्र संदेहः ॥ चारु ॥ सत्यं ॥ शर्वि ॥ स

अत्रयूरितंकथांतरंपत्रो

त्यं॥चाह॥पघेवंशीघ्रमपं॥शर्वि॥किं॰हन्मतां॥चाह॥नहि२मुच्यतां॥शर्वि॥किमर्थं॥चाह॥
शत्रु॰कृतापराधःशरणमुपेत्यपादयोःपतितः॥शस्त्रेणनहंतव्यः॥शर्वि॥एवंतर्हिश्वभिःखा
घतां॥चाह॥नहि२उपकारहतस्तुकर्तव्यः॥शर्वि॥अहोआश्चर्यंकिंकरोमिवदत्वार्यः॥चाह
॥तन्मुच्यतांइतिमुक्तः॥शकाहीमादिके॰पच्चुजीविदेह्नि॰इतिपुरुषैःसहनिष्क्रांतः॥शर्वि॥
आर्येवसंतसेनेपरितुष्टोरज्ञाभवतींवधूशब्देनानुगृह्णाति॥वसंत॥अज्ज॰कदत्यंह्मि॥शर्वि॥
वसंतसेनामवगुंठ्य॥चारुदत्तंप्रति॥आर्यकिमस्यभिक्षोःक्रियतां॥चाह॥भिक्षोकिंतवबहुमतं
भिक्षुः॥ईदिसंअणिच्चतणं॰पेक्खिअ॰दिउणो॰मे॰पव्वज्जाए॰वहुमाणो॰संवुत्ते॥चाह॥सखे
दृढोस्यनिश्चयः तस्यपृथिव्यांसर्वविहारेषुकुलपतिरयंक्रियतां॥शर्वि॥पथ्याहआर्यः॥भिक्षुः॥ एम॰
प्रियंनःप्रियं॥वसंत॥संपदंजीवाविदह्मि॰॥शर्वि॥स्थावरकस्यकिंक्रियतां॥चाह॥मुसंवृत्तःअ

दासोभवतु॥ तेचांडालाःसर्वचांडालाणामधिपतयोभवंतुचंदनकस्यपृथ्वीदंडपालताभवतुनस्रा
ष्ठिपश्पालस्ययथैवक्रियापूर्ववर्तमानातथैवास्तु॥ शर्वि॥ एवंयथाहआर्यः परमेनंमुंच २ व्याप
दयामि॥ चारु॥ अभयंशरणागतस्य॥ शत्रुःकृतापराध इतिपुनःपठति॥ शर्वि॥ तदुच्यतांकिंतेभू
यःप्रियमुपकरोमि॥ चारु॥ अतःपरंप्रियमस्ति॥ लब्धारिअभुद्धिस्वरणनिपतितःशत्रुरप्य
प्येषमुक्तःसोत्वाताएतिमूलःप्रियसुहृद्‌चलामार्यकःशास्तिराजा॥ आमात्भूपःप्रियेयंप्रि
यसुहृदिभवान्संगतोमेवयस्मोलभ्यंकिंचातिरिक्तंयदपरमधुनामार्थयेहंभवंतं॥ स्वगतं॥ कां
श्चित्तुच्छपतिप्रभूरपतिवाकांश्चिन्नयत्युन्नतिंकांश्चित्पाततविधौकरोतिचपुनःकांश्चिन्नयत्याकु
लान्॥ अन्योन्यमतिपक्षसंहतिमिमांलोकस्थितिंबोधयन्नेषक्रीडतिकूपयंत्रघटिकान्या
यप्रसक्तोविधिः॥ प्रकाशं॥ तथापीदमस्तु॥ क्षीरिणःसंतुगावोभवतुवसुमतीसर्वसंपन्नसस्या

पर्जन्यःकालवर्षीसकलजनमनोनंदिनोवांतुवाताःमोदंतांजन्मभाजःसततमभिमताब्राह्मणाः
संतुसंतःश्रीमंतःपांतुपृथ्वीप्रशमितरिपवोधर्मनिष्ठाश्चभूपाः॥ ॥इतिनिष्क्रांताःसर्वेसंहारोना
मदशमोंकः॥ ॥समाप्तंचेदंमृच्छकटिकंनामप्रकरणं॥ ॥शुभंलेखकपाठकयोः॥ ॥ग्रंथसं
ख्या २२७५ ॥ ॥संवत १८३२ मितिफाग्गुणवदि११ संन ११८४ साल ॥

63